**International Journal of Multidisciplinary Education and Research**
**ISSN: 2455-4588; Impact Factor: RJIF 5.12**
**www.newresearchjournal.com/multieducation**
**Volume 1; Issue 3; May 2016; Page No. 46-52**

# गदाधरभट्टाचार्यः तस्य व्युत्पत्तिवादश्च

**श्याम-सुन्दर-शर्मा**

शोधच्छात्रः, संस्कृत-विभागः, दिल्ली-विश्वविद्यालयः

**शोधपत्रसारः**

शोधपत्रेऽस्मिन् सामान्यरूपेण न्यायपरम्परा, व्युत्पत्तिवादकारस्य गदाधरभट्टाचार्यस्य जन्मस्थलम्, विद्यास्थलम्, कालः, कृतयः, वंशवृक्षश्चेत्यादयो वैयक्तिकपक्षं कृतित्वपक्षञ्चावलम्ब्य केचन विषयाः प्रगटिताः तथा च विशेषरूपेण व्युत्पत्तिवादस्य तात्पर्यम्, संरचना, लेखनविधिः, सिद्धान्ताः, एवञ्च संस्कृत-हिन्दी-आङ्ग्लव्याख्यानग्रन्थाः, उपटीका चेत्यादयो व्युत्पत्तिवादविषयकविविधपक्षा अन्वेषिताः, विश्लेषिताः, निर्णीतरूपे समुपस्थापिताश्च।

**मूलशब्दाः** - न्यायशास्त्रम्, नव्यन्यायशास्त्रम्, गदाधरभट्टाचार्यः, व्युत्पत्तिवादः, बङ्गालप्रदेशः, नवद्वीपः, व्याकरणशास्त्रम्, कारकव्यवस्था।

## 1. प्रस्तावना

आरम्भिककालिकगौतम-वात्यस्यायन-उद्योतकर इत्यादयः न्यायशास्त्रज्ञाः तत्त्वानि विवेचने संलग्ना आसन्। परञ्चानन्तरकालीनजयन्तभट्ट-गङ्गेशोपाध्याय-रघुनाथ-भवान्द-जगदीश-गदाधरभट्टाचार्येत्यादभिः न्यायशास्त्रज्ञैः तत्त्वैः सह भाषायाः दार्शनिकपक्षस्यापि विवेचनं समारब्धम्।

संस्कृतवाङ्मये न्यायशास्त्रं व्याकरणशास्त्रञ्च अतिविशिष्टं स्थानं भजते। द्वावपि मानवसंचारमाध्यमभाषायाः महत्वपूर्णमेकमङ्गं वाक्यं भावबोधयितुं विश्लेष्येते। द्वयोरपि भाषाचिन्तनपरम्परा प्राक्तना विशिष्टा चास्ति। वैयाकरणनैयायिकयोर्द्वयोरपि चिन्तनं वाक्यसिद्धान्तेषु सूक्ष्मातिसूक्ष्मरूपात्मकमस्ति। परञ्च गदाधरभट्टाचार्यस्य कालपर्यन्तं यथाविधमावश्यक्यमासीत्, तथाविधं नैयायिकवैयाकरणीयसिद्धान्तानां द्विपक्षीयकं विश्लेषणं न जातम्। तत्काले द्वयोरपि भाषाचिन्तनपरम्परयोः परस्परं सम्मिल्य विश्लेषणानन्तरं नवोन्मेषिसिद्धान्तानां प्रस्थापनस्य आश्यकता आसीत्। एतदेव कार्यं गदाधरभट्टाचार्येण सुष्ठुतया सम्पादितम्। अनेन प्राचीननैयायिकानां नव्यनैयायिकानां तथा वैयाकरणानाञ्च सिद्धान्तान् विलोडनपुरस्सरं समेकितवाक्यार्थसम्बन्धिसिद्धान्ताः व्युत्पत्तिवादनामकग्रन्थे प्रसूताः।

## 2. गदाधरभट्टाचार्य एवं न्यायपरम्परा[1]

| क्र. | धारा | प्रमुखकृतिकाराः | प्रमुखकृतयः | कालः |
|---|---|---|---|---|
| 01 | प्राच्यन्यायः | गौतमः | न्यायसूत्रम् | द्वितीयं शतकम् (ईशापूर्वः) |
| 02 | | वात्स्यायनः | न्यायसूत्रभाष्यम् | द्वितीयं शतकम् |
| 03 | | उद्योतकरः | न्यासूत्रभाष्यवार्तिकटीका | तृतीयं शतकम् |
| 04 | | वाचस्पतिमिश्रः | न्यायसूत्रभाष्यवार्तिक-तात्पर्यटीका, न्यायमञ्जरी | नवमं शतकम् |
| 05 | | उदयनाचार्यः | न्यायसूत्रभाष्यवार्तिकतात्पर्य-परिशुद्धिटीका, न्यायकुमाञ्जलिः | “ |
| 06 | | जयन्तभट्टः | न्यायमञ्जरी | “ |
| 07 | नव्यन्यायः | गङ्गेशोपाध्यायः | तत्त्वचिन्तामणिः | त्रयोदशतमं शतकम् |
| 08 | | रघुनाथशिरोमणिः | तत्त्वचिन्तामणिदीधितिटीका | षोढशतमं शतकम् |
| 09 | | भवानन्दः | शब्दार्थसारमञ्जरी (दशलकारार्थनिर्णयः, आख्यातविचारः, षट्समासविवेचनम्, कारकचक्रम्) | “ |
| 10 | | रुद्रामः | कारकव्यूहः | “ |
| 11 | | मथुरानाथतर्कवागीशः | (तत्त्वचिन्तामणि-दीधिति) माथुरीटीका, गूढार्थप्रकाशिनी-टीका च | “ |
| 12 | | जगदीशभट्टाचार्यः | (तत्त्वचिन्तामणि-दीधिति) जगदीशीटीका, शब्दशक्तिप्रकाशिका च | सप्तदशतमं शतकम् |
| 13 | | गदाधरभट्टाचार्यः | (तत्त्वचिन्तामणि-दीधिति) गदाधरीटीका, व्युत्पत्तिवादश्च | “ |
| 14 | | जयरामः | कारकवादः | “ |

1 http://sa.wikipedia.org/wiki/%E0%A4%A8%E0%A5%8D%E0%A4%AF%E0%A4%BE%E0%A4%AF%E0%A4%A6%E0%A4%B0%E0%A5%8D%E0%A4%B6%E0%A4%A8%E0%A4%AE%E0%A5%8D#.E0.A4.86.E0.A4.9A.E0.A4.BE.E0.A4.B0.E0.A5.8D.E0.A4.AF.E0.A4.97.E0.A5.8C.E0.A4.A4.E0.A4.AE.E0.A4.83

| | | | | |
|---|---|---|---|---|
| 15 | | गोकुलनाथ: | पदवाक्यरत्नाकर: | “ |
| 16 | | गिरिधरभट्टाचार्य: | विभक्त्यर्थनिर्णय: | “ |
| 17 | | विश्वनाथपञ्चाननभट्टाचार्य: | कारिकावली, तट्टीका मुक्तावली च | अष्टादशतमं शतकम् |
| 18 | | अन्नम्भट्ट: | तर्कसंग्रह: | “ |

### 3. गदाधरभट्टाचार्यस्य जन्मस्थलं विद्यार्जनञ्च

महानुभावोऽसौ बङ्गालप्रदेशस्य बगुडाजनपदे लक्ष्मीपाशानामाख्यग्रामे शिवाचार्यगोस्वामिन: सन्ततित्वेन जनिम्लेभे। एतस्य जनक: तन्त्रविद्यानिष्णातोऽविद्यत। अतश्चासौ तन्त्रविद्यां तत अध्यैष्ट[2]।

षोडशशताब्द्या उत्तरार्धे वासुदेवसार्वभौम: (1480-1539 ई.) आधुनिके बङ्गालस्य नदिया (नवद्वीप:) जनपदे[3] गुरुकुलमेकं संस्थापितम्[4]। तच्च गुरुकुलं तत्काले न्यायविद्याराजधानित्वेन चतुर्दिक्षु प्रसिद्धिमवाप्तवदासीत्। एतदर्थमनेन गदाधरभट्टाचार्येण तत्र न्यायविद्या हरिरामतर्कवागीशाचार्यं निकषा उषित्वा सुष्ठुतया समधिगता[5]। एतस्य प्रतिभासमृद्धिमवगम्य तदानीन्तनो महान् न्यायाचार्य: जगदीशतर्कालङ्कारोऽपि हतप्रभतामन्वभूत्। गदाधरस्य यौवने, जगदीशतर्कालङ्कार: वयोवृद्ध: ज्ञानवृद्धश्चासीत्[6]। अनयो: विविधेषु सिद्धान्तेषु परस्परं बुद्धिवैमत्यं यत्र तत्र दरीदृश्यते। नवद्वीपे गुरुवर्याणाम् परलोकयात्राया: आनन्तर्ये गदाधर: तत्रैव आचार्यपदवीम् आरूह्य चिरमध्यापनकर्मणि व्यावृत्त: जीवनं यापयामास[7]।

### 4. गदाधरभट्टाचार्यस्य काल:

राजेन्द्रघोषकृतायाम् ‘अद्वैतसिद्धि’भूमिकायाम् एवञ्च ‘बङ्गे नव्यन्यायचर्चा’नुसारमेतस्य काल: दिसम्बर चत्वार्युत्तरषोढशशताब्दी (1604) त: फरवरी नवोत्तरसप्तदशशताब्दी (1709) पर्यन्तमङ्गीकृतो वर्तते[8]। परञ्चात्र संस्कृतसाहित्यपरिषदा प्रकाशितस्य नवमुक्तिवादस्य कालीपदतर्काचार्यकृतायां भूमिकायामेतस्योपस्थितिकाल: एकोनशतोत्तरपञ्चदशशताब्दी (1599) त: त्रयोत्तरसप्तदशशताब्दी (1703) पर्यन्तमासीदित्येतद् भणितम्। वस्तुतस्तु तस्याचार्यस्य कोऽपि काल: स्यात्, परमेतत्तथ्यमैतिह्यसिद्धं वर्तते यदसौ सप्तदशशतके महान् शतवर्षं यावत् जीवनं धारयामास[9]।

### 5. गदाधरभट्टाचार्यस्य कृतय:

‘नव्यतार्किकचक्रवर्ती’त्युपाधिना जगतितले विश्रुतै: गदाधरभट्टाचार्यै: नैके ग्रन्था: व्यरच्यन्त। ग्रन्थानामेतेषामध्ययनाध्यापनेन च बुद्धितैक्ष्ण्यं जायत इति पण्डितानामनुभव:[10]। भट्टाचार्योऽयं चतुर्षष्टिग्रन्थानां[11] प्रणेता इति श्रुतिपथमायाति। तस्य ज्ञातग्रन्था: नामत: प्रस्तूयन्तेऽत्र[12]।

| | |
|---|---|
| 01 व्युत्पत्तिवाद: | 21 कारणतावाद: |
| 02 मूलानुमानखण्डटीका | 22 अपेक्षाबुद्धिकारणतावाद: |
| 03 शब्दमण्यालोकटीका | 23 रत्नकोषवादरहस्यम् |
| 04 प्रत्यक्षालोकटीका | 24 आख्यावाद: |
| 05 अनुमानालोकटीका | 25 कारकवाद: |
| 06 प्रत्यक्षदीधितिटीका | 26 विधिवाद: |
| 07 अनुमानदीधितिटीका | 27 विषयतावाद: |
| 08 कुसुमाञ्जलिटीका | 28 संशयवाद: |
| 09 प्रामाण्यमिश्रटीका | 29 विशिष्टवैशिष्ट्यबोधवाद: |
| 10 मूलतत्त्वचिन्तामणिटीका | 30 स्मृतिसंस्कारवाद: |
| 11 बौद्धाधिकारदीधितिटीका | 31 स्वर्गवाद: |
| 12 मुक्तावलीटीका | 32 नञ्वाद: |
| 13 काव्यप्रकाशटीका | 33 प्रामाण्यवाद: |
| 14 चण्डीटीका | 34 शक्तिवाद: |
| 15 तत्त्वचिन्तामणिदीधितिप्रकाशिका | 35 मुक्तिवाद: |
| 16 विवाहवादार्थ:[13] | 36 बुद्धिवाद: |
| 17 एकपाणिवाद: | 37 विधिस्वरूपम् |
| 18 निर्विकल्पकस्मरणवाद: | 38. ऋग्वेदोक्तदशकर्मपद्धति: |
| 19 मुक्तिवाद: | 39. वादवारिधि:[14] |
| 20 विष्णुप्रीतिवाद: | |

2 National Encyclopedia of Bangladesh, http://www.banglapedia.org/HT/B_0539.htm
3 Encyclopedia of Oriental Philosophy and Relegion, vol-01, (Hindusm), P -251.
4 Tarka Bhasha, Introduction, P-37
5 A History of Indian Logic, P-479
6 व्युत्पत्तिवाद:, कीर्त्यानन्द:, भूमिका, पृ. सं. 47-48.
व्युत्पत्तिवाद:, सच्चिदानन्दमिश्र:, भूमिका, पृ. सं.-06.
7 Sanskrit Wikipedia.
व्युत्पत्तिवाद:, सच्चिदानन्दमिश्र:, भूमिका, पृ. सं.-12.
8 History of Navya-Nyaya in Bangal, Part-01, P-182.
9 व्युत्पत्तिवाद:, सच्चिदानन्दमिश्र:, भूमिका, पृ. सं.-21.
10 व्युत्पत्तिवाद:, एन्. एस्. रामानुज-ताताचार्य:, प्रस्तावना.
11 National Encyclopedia of Bangladesh, http://www.banglapedia.org/HT/B_0539.htm
12 A. Encyclopedia of Oriental Philosophy and Religion, vol.-01, (Hinduism), P -251.
B. Essay in Classical and Modern Hindu Laws, P-303.
C. History of Indian Logic, P-482.
D. National Encyclopedia of Bangladesh, http://www.banglapedia.org/HT/B_0539.htm
E. व्युत्पत्तिवाद:, कीर्त्यानन्द:, भूमिका. पृ. सं. 47-48.
F. व्युत्पत्तिवाद:, सच्चिदानन्दमिश्र:, भूमिका, पृ. सं. 12-13.
13 Vivah-Vadarth, P-171.
14 वादवारिधि:.

## 6. गदाधरभट्टाचार्यस्य वंशवृक्षः[15]




15 व्युत्पत्तिवादः, कीर्त्यानन्दः, पृ. सं. 47-48.

### 7. व्युत्पत्तिवाद:

गदाधरभट्टाचार्य: पञ्चविंशत्युत्तरषोढशशताब्दी (1625) तमे ईस्वीये काले व्युत्पत्तिवादं व्यरचत इति आकलय्यते विद्वद्भि:[16]। संस्कृतसमालोचकै: निष्कर्षत्वेन सयुक्तिकं निगद्यते यत् भाट्टीयरचनातन्त्रेषु व्युत्पत्तिवाद: स्वस्य प्रागुण्येन अद्वितीयपदमलङ्करोति। स्वकीयया विशिष्टया पदरचनया ग्रन्थोऽयं न्यायशास्त्रस्य व्याकरणशास्त्रस्य च क्लिष्टतमग्रन्थरूपेण परिगण्यते। ग्रन्थेऽस्मिन्तेनार्थविज्ञानमभिलक्ष्य व्याकरणन्यायशास्त्रसम्बन्धिकारक-मधिकृत्य नव्यन्यायशैल्यां विचारा: गुम्फिता: विश्लेषिताश्च[17] ।

ग्रन्थेऽस्मिन् प्रकृतीनां प्रत्ययानाञ्चार्थविशेषे शक्ति:, शक्तिग्रहाकार:, तद्ग्रहजन्यशाब्दबोधस्य कार्यकारणभावप्रकार:, एवञ्च प्रकृतिप्रत्यययोरानुपूर्वी-रूपाकाङ्क्षाया:, पदसमभिव्याहाररूपा-काङ्क्षायाश्च तज्जन्यशाब्दबोधयो: कार्यकारणभावप्रकारा:, तथा च केचन्नियमा: तन्निर्वाहकाश्च कार्यकारणभावा: समुचितरीत्या सारगर्भितविवेचनपुरस्सरं सन्दर्भानुसारेण समुध्रीयन्ते[18] ।

ग्रन्थोऽयं शाब्दबोधपरक: गम्भीरविचारप्रचुरश्च विद्योतते। अत्र सप्तविभक्तीनामर्था:, तेषां समभिव्याहृतधात्वर्थेऽन्वयप्रकार:, विशिष्टशाब्दबोधप्रकार:, तदुपयोगिकार्यकारणभावश्च नानाविधयुक्ति-प्रदर्शनपूर्वकं प्रतिपादिता:। अत्र प्रातिपदिकार्थ:, सुबर्थ:, धात्वर्थ:, लकारार्थ:, णिच्-सन्-क्यच्-काम्यच्-प्रत्ययानामर्थ:, स्त्रीप्रत्ययार्थ:, तद्धितार्थ:, कृदर्थश्च व्याख्याता:। एतेषां पदार्थान्तरेण साकमन्वयप्रकारश्च सयुक्तिकं निरूपित:।

### 8. 'व्युत्पत्तिवाद'शब्दस्य व्युत्पत्ति:

उत्कृष्टा पत्ति: उत्पत्ति:, उत्पूर्वकाच्चौरादिक-दैवादिको वा पद्गतौ[19] धातोर्क्तिन्[20] प्रत्यये कृते सति निष्पन्नोऽयं शब्द:, 'गतिर्ज्ञानञ्च' (सर्वे गत्यर्थका: धातव: ज्ञानार्थका एव हि) इत्यस्मात् पाणिनिनियमात् पद्धातोरर्थरत्रावबोधरिति। अतश्च उत्कृष्ट-प्रतिपत्ति: उत्पत्ति:, विशिष्टा चासौ उत्पत्ति: व्युत्पत्तिरिति कर्मधारयसमास:[21] ।

### 8.1 'व्युत्पत्ति'शब्दस्य परिभाषा

एतत्सन्दर्भे व्याकरणशास्त्रे न्यायशास्त्रे च पृथक् पृथक् परिकल्पना कृता विद्यते। तद्यथा -

- व्याकरणशास्त्रे प्रकृतिप्रत्ययभेदकज्ञानमेव व्युत्पत्तिनाम्ना ज्ञायते। तथा हि 'डुपचष् पाके' इति भौवादिकधातोर्वर्तमानकाल एकवचनविवक्षायां कर्तरि लट्प्रत्यय इति पचतीत्यस्य व्युत्पत्ति:।
- न्यायशास्त्रे नियमविशेषो व्युत्पत्ति:। स च कार्यकारणभावमूलक:, प्रतिबध्यप्रतिबन्धकभावमूलकश्च। कार्यकारणभावो नाम - तद्पदजन्यतदर्थविषयकशाब्दबोधत्वावच्छिन्नं प्रति तद्पदनिष्ठवृत्तिज्ञानस्योपस्थिति: कारणतया कल्प्यते। अस्यायमाशय: - निश्चितकारणं (पदम् उत् वा वाक्यम्) सत्वे, निश्चितकार्यस्य (अर्थोपस्थिते: उत् वा शाब्दबोधस्य) उत्पत्तिर्जायते। प्रतिबध्यप्रतिबन्धकभावस्याशयोऽयम् - निश्चितकारणं (पदम् उत् वा वाक्यम्) असत्वे, निश्चितकार्यस्य (अर्थोपस्थिते: उत् वा शाब्दबोधस्य) उत्पत्तिर्न जायते। पदेन पदार्थोपस्थितिरिति अर्थोपस्थितिनाम्ना तथा च वाक्येन वाक्यार्थस्योपस्थितिरिति शाब्दबोधनाम्ना परिचीयते[22]।

### 8.2 'वाद'शब्दस्य निर्माणम्

'वदनं वाद:' अत्र 'वद्' व्यक्तायां वाचीति भौवादिकधातो:[23] 'भावे'[24] इत्यनेन भावार्थे घञि कृते वादशब्दः सिद्धोऽयमभिव्यक्त्यर्थं सूचयति।

### 8.3 व्युत्पत्तिवादशब्दयोरन्तरसम्बन्ध:

अत्र व्युत्पत्तिवादशब्दयोरन्तरसम्बन्ध: त्रिधा भवितुं पार्यते। तथा हि -

1) 'व्युत्पत्तीनां वाद: व्युत्पत्तिवाद:', इति सम्बन्धार्थे षष्ठीतत्पुरुषसमास:[25] । अत्र व्युत्पत्तिवादशब्द:, व्युत्पत्तिप्रतिपादकग्रन्थ इत्यर्थं बोधयति।
2) 'व्युत्पत्ती: वदतीति व्युत्पत्तिवाद:', 'उपपदमतिङ्'[26] इत्यनेन उपपदसमास:, 'कर्मण्यण्'[27] इत्यनेन व्युत्पत्ति-उपपदकात् 'वद्' धातोरणि कृते निष्पन्नोऽयं वादशब्दः व्युत्पत्तिनिष्ठ-कर्मत्वस्यावबोधक इत्यस्यार्थ:।
3) 'व्युत्पत्तये वाद: व्युत्पत्तिवाद' इत्यत्र 'चतुर्थी तदर्थार्थबलिहितसुखरक्षितै:'[28] इत्यनेन चतुर्थी तत्पुरुषसमास:। व्युत्पत्यर्थं (नियमविशेषाय) कृत: वादरिति व्युत्पत्तिवाद:।

---

16 तदेव

17 व्युत्पत्तिवाद:, सच्चिदानन्दमिश्र:, भूमिका, पृ. सं.-22.

18 व्युत्पत्तिवाद:, एन्. एस्. रामानुज-ताताचार्य:, प्रस्तावना.

19 वैयाकरणसिद्धान्तकौमुदी, गोपालदत्तपाण्डेय:, पृ. सं.-256.

20 तदेव, 'स्त्रियां क्तिन्', कृदन्तप्रकरणम्, सूत्रसंख्या-3272 (03/03/94), पृ सं.-347.

21 तदेव, 'विशेषणं विशेष्येण बहुलम्', सूत्रसंख्या 736 (02/02/57), पृ सं.-79.

22 व्युत्पत्तिवाद:, रामप्रसाद: त्रिपाठी, शोधपत्रम्

23 वैयाकरणसिद्धान्तकौमुदी, गोपालदत्तपाण्डेय:, धातुसंख्या 1009, पृ. सं.-224.

24 तदेव, सूत्रसंख्या 3184 (03/03/18), पृ. सं.-341.

25 तदेव, 'षष्ठी', सूत्रसंख्या 702 (02/02/08), पृ. सं.-76.

26 तदेव, सूत्रसंख्या 782 (02/02/19), पृ. सं.-83.

27 तदेव, सूत्रसंख्या 2913 (03/02/01), पृ. सं.-300.

28 पाणिनि-अष्टाध्यायी 02/02/36

### 8.4 व्युत्पत्तिवादशब्दस्य निर्णीतार्थः

निष्कर्षत्वेनोच्यते चेत् व्युत्पत्तिरित्युक्ते 'शाब्दबोधाय सिद्धान्ताः', 'वाद' इत्युक्ते 'प्रकटनम्'। साकल्येनोच्यते चेत् "शाब्दबोधाय सिद्धान्तानां प्रकटनम्" एव व्युत्पत्तिवादशब्दस्य मूलार्थः।

### 9. व्युत्पत्तिवादस्य लेखनविधा

गदाधरभट्टाचार्यैः शाब्दबोधायोपयुक्तसिद्धान्तानामन्वेषणक्रमे प्राच्यनव्यनैयायिकानां प्राच्यवैयाकरणानां नव्यनैयायिकानाञ्च सिद्धान्ताः विश्लेषिताः। भट्टाचार्य आदौ प्राच्यनैयायिकसिद्धान्तान् प्रस्तौति। तत्र दोषमुद्भावयति। अनन्तरं समागत दोषान् स्वयमेव परिमार्जयति। एष एव क्रमः प्राच्यनैयायिकसिद्धान्तानां निरुत्तरपर्यन्तं प्रचलति। एषा एव विधा प्राच्यवैयाकरणसिद्धान्तानां विवेचनविषये तथा च नव्यनैयायिकसिद्धान्तानां विवेचनविषये दृश्यते।

### 10. व्युत्पत्तिवादस्य सिद्धान्ताः

शाब्दबोधसम्बन्धी प्राच्यनैयायिकानां प्राच्यवैयाकरणानाञ्च सिद्धान्तेषु परिष्कारोपरान्तेऽपि दोषा अवशिष्यन्ते। परञ्च नव्यनैयायिकानां सिद्धान्तेषु परिष्कारोपरान्ते दोषाः समाप्तिं यान्ति उत् वान्यसाम्प्रदायिकसिद्धान्तानामपेक्षा न्यूनदोषा अवशिष्यन्ते। अतो व्युत्पत्तिवादे गदाधरभट्टाचार्यैः परिष्कृतनव्यन्यायसिद्धान्ता एवेतस्य निर्णीतराद्धान्तारित्यवगम्यते।

### 11. नव्यव्याकरणपरम्परायै व्युत्पत्तिवादस्यावदानम्

प्राच्यवैयाकरणेषु प्रतिनिधिभूतः भट्टोजिदीक्षितः कर्तृवाच्ये कर्मवाच्ये च 'व्यापारमुख्यविशेष्यकं' शाब्दबोधमगङ्गीकरोति। नव्यवैयाकरणेषु प्रतिनिधिभूतः नागोजिभट्टः कतृवाच्ये भट्टोजिदीक्षितमनुकरोति। परञ्च कर्मवाच्ये 'फलमुख्यविशेष्यकं' शाब्दबोधमगङ्गीकरोति। उभयोर्मध्ये कर्मवाच्य एव मतवैभिन्यं वर्तते।

शोधकर्तुर्दृष्टौ नागेशेनायं सिद्धान्तो व्युत्पत्तिवादतः स्वीकृतः। यतोहि तत्र गदाधरेण व्युत्पत्तिवादग्रन्थे प्राच्यवैयाकरणानां सिद्धान्तस्य संशोधनक्रमे सिद्धान्तोऽयं प्रस्तुतः, परञ्च गौरवदोषादयं परित्यक्तस्तेन। आनन्तर्ये नागेशेन गौरवदोषस्य परिहारं कृत्वा अयमेव सिद्धान्तः स्वीकृतः।

### 12. व्युत्पत्तिवादस्य व्याख्यानग्रन्थाः

### 12.1 संस्कृत-व्याख्यानग्रन्थाः

| क्र. | व्याख्या | व्याख्याकारः | सम्पादकः | प्रकाशकः | वर्षम् | उपलब्धिः |
|---|---|---|---|---|---|---|
| 01 | कृष्णभट्टीया | कृष्णभट्टः | | | | प्रथमाविभक्तिपर्यन्तम् |
| 02 | आदर्शटीका | सुदर्शनाचार्यः | श्रीकृष्णदासखेमराजः | मुम्बई-नगरम् | 1970 | सम्पूर्णग्रन्थे |
| | | | | वाणीविलासप्रेस, वाराणसी। | 1985 | द्वितीयाविभक्तिपर्यन्तम् |
| | | | हरेरामत्रिपाठी | राष्ट्रिय-संस्कृत-संस्थानम्, नवदेलही | 2011 | सम्पूर्णग्रन्थे |
| 03 | गूथार्थतत्त्वा-लोकटीका | धर्मदत्तः (बच्चा) | कीर्त्यानन्दः | चैखम्बा-अमर-भारति-प्रकाशनम्, वाराणसी | 1977-1st ed. | सम्पूर्णग्रन्थे |
| 04 | प्रकाशटीका | लक्ष्मीनाथः | | चैखम्बा-संस्कृत-संस्थानम्, वाराणसी | 1988 | सम्पूर्णग्रन्थे |
| 05 | जयाटीका | जयदेवमिश्रः (1911-1982) | उमेशमिश्रः | स्वयम्-इलाहाबादः | 1927-1st ed.<br>1940-2nd ed.<br>1953- 3rd ed. | सम्पूर्णग्रन्थे |
| | | | | चैखम्बा-संस्कृत-सीरीज, वाराणसी | | द्वीतीयाविभक्तिपर्यन्तम् |
| 06 | नौकाटीका | खुद्दी | | | | प्रथमाविभक्तिमध्यावधि-पर्यन्तम् |
| 07 | तरणीटीका | उग्रानन्दः[29] | | | | |
| 08 | दीपिकाटीका | शिवदत्तमिश्रः | ज्वालाप्रसादगौडः | भारतीय-विद्या-प्रकाशनम्, वाराणसी. | 1973-1st ed. | द्वीतीयाविभक्ति-प्रथमभागपर्यन्तम् |
| | | | | चैखम्बा-सुरभारति-प्रकाशनम्,वाराणसी. | 1983-2nd ed.<br>2010 | |
| 09 | शास्त्रार्थकलाटीका | वेणीमाधवः शुक्लः | राजनारायणः शास्त्री | चैखम्बा-संस्कृत-सीरीज, वाराणसी. | 1969-2nd ed. | द्वीतीयाविभक्तिपर्यन्तम् |
| | | | | चैखम्बा-संस्कृत-संस्थानम्, वाराणसी. | 1987-3rd ed. | |
| | | | | चैखम्बा-प्रकाशनम्, वाराणसी | 2007 | |
| 10 | विद्वन्मनोरमाटीका | एन्.एस्. रामानुज- ताताचार्यः | हरेकृष्णसतपथी | राष्ट्रिय-संस्कृत-विद्यापीठम्, तिरुपतिः | 2011-1st ed. | सम्पूर्णग्रन्थे |

29 Critical Edition of the text of Vyutpattivada, Achyutanand Das, Part 01, Preface, P-09

### 12.2 हिन्दी-व्याख्यानग्रन्था:

| | | | | | |
|---|---|---|---|---|---|
| 01 | सुनन्दाव्याख्या | सच्चिदानन्दमिश्र: | भारतीयविद्याप्रकाशनम्, वाराणसी | 2001 | सम्पूर्णग्रन्थे |
| 02 | तत्त्ववोधिनीव्याख्या | हरिनारायणतिवारी | चैखम्बाविद्याभवनम्, वाराणसी | 2005 | सम्पूर्णग्रन्थे |
| 03 | इन्दुकलाव्याख्या | वैद्यनाथ: झा | हंसाप्रकाशनम्, जयपुरनगरम् | 2001-1st ed. | प्रथमाविभक्तिपर्यन्तम् |

### 12.3 आङ्ग्ल-व्याख्यानग्रन्था:

| | | | | | |
|---|---|---|---|---|---|
| 01 | Navya Nyaya Theory of Verbal Cognition (Critical Study of Gadadhar Bhattacharya's Vyutpattivada) | B. P. Bhatta | Deccan College, Poona. | 1996 | All |
| 02 | Vyutpattivada: A Critical Study | Achyutanand Das | UGC Project | 2001 | All |
| 03 | Vyutpattivada with seven commentaries | Achyutanand Das (Editor) | New Bharatiya Book Cooperation, Delhi. | 2004 | First case |

### 13. व्युत्पत्तिवादस्योपटीका

धर्मदत्तेन व्युत्पत्तिवादस्येका प्रौढा टीका गूढार्थतत्त्वालोकनाम्रा कृता। एतट्टिकामवलम्ब्य तच्छिष्यशशिनाथेन तां बोधगम्याय 'अर्थदीपिका' नामिकोपटीका कृता वर्तते [30] । सा च टीका परिष्कृतोपव्याख्यात्वेन परिचीयते। महद्सौभाग्यस्यविषयोऽयं यदेषोपव्याख्या सम्पूर्णव्युत्पत्तिवादग्रन्थमधिकृत्य निबन्धिता समुपलभ्यते च। एतत्तथ्येनावबोधयितुं शाक्नुवन्ति भवन्त: मूलग्रन्थस्य काठिन्यम्।

### 14. निष्कर्ष:

सप्तदशशतकीय: बंगालप्रदेशीय: गदाधरभट्टाचार्य: शिवाचार्यगोस्वामिन: सुत आसीत्। अनेन तन्त्रविद्या स्वपितु:, न्यायविद्या हरिरामतर्कवागीशाच्चाधीता। असौ बंगालस्थे नवद्वीपगुरुकुलेऽधीतस्तत्रैवाध्यापितामास च। श्रूयते यदनेनचतुर्षष्टिग्रन्था: व्यरचिता:, परञ्च अद्यावधिपर्यन्तं केचन एव ग्रन्था उपलभ्यन्ते। समेषां ग्रन्थानां नामान्यपि न जानीम: वयम्। एतेषु ग्रन्थेषु 'व्युत्पत्तिवाद:' अतिप्रमुखं स्थानं भजते। उत्तरवर्तिशाब्दबोधशास्त्रिणां कृते इदं ग्रन्थरत्नमुपकाराय वर्तते। भट्टाचार्यस्य सन्ततिभिरपि दीर्घकालपर्यन्तं न्यायशास्त्रपरम्परा प्रवाहिता विद्यते स्म।

व्युत्पत्तिवादशब्दस्य तात्पर्यं तावत् 'शाब्दबोधाय सिद्धान्तानां प्रकटनम्'। ग्रन्थेऽस्मिन् सप्तविभक्तीनामर्था:, तेषां समभिव्याहृतधात्वर्थेऽन्वयप्रकार:, विशिष्टशाब्दबोधप्रकार:, तदुपयोगिकार्यकारणभावश्च नानाविधयुक्तिप्रदर्शनपूर्वकं प्रतिपादिता:। अत्र प्रातिपदिकार्थ:, सुबर्थ:, धात्वर्थ:, लकारार्थ:, णिच्-सन्-क्यच्-काम्यच्-प्रत्ययानामर्थ:, स्त्रीप्रत्ययार्थ:, तद्धितार्थ:, कृदर्थश्च व्याख्याता:। एतेषां पदार्थान्तरेण साकम् अन्वयप्रकारश्च सयुक्तिकं निरूपित:।

[30] व्युत्पत्तिवाद:, कीर्त्यानन्द:, भूमिका पृ. सं. 47-48.
व्युत्पत्तिवाद:, सच्चिदानन्दमिश्र:, भूमिका, पृ. सं.-17.

### 15. सन्दर्भसहायकग्रन्थ-नामावलि:


1. Bhatt, VP. Navya Nyaya Theory of Verbal Cognition (Critical Study of Gadadhar Bhattacharya's Vyutpattivada). 01-02, Deccan College, Poona, First Edition, 1996. Eastern Book linkers, Delhi, Second Edition, 1990. Third Edition, 2001.
2. Bhattacharya, G. (Editor & Translator). Commentary on the Compendium of Logic, Progressive Publication, 1983.
3. Derrett, JDM (Translator). Vivah Vadartha, the Adyar Library Bulletin, 27/01, P-171.
4. Iyer, S.R. Tarka Bhasha, Chaukhamba Orientalia, Varanasi, First Edition, 1979.
5. Sharma, Ram Nath (Editor). The Ashtadhyayi (English Translation, with Sanskrit Text, Explanatory Notes, Derivational History of Examples), Munsi Ram Manohar Lal Publication, Jhansi Rani Road, New Delhi, First Edition, 1987. 02nd Edition, 2007.
6. कीर्त्यानन्द: (सम्पादक:). *व्युत्पत्तिवाद:* (गूथार्थतत्त्वालोक-संस्कृतटीकासहित:), चौखम्बा-अमर-भारति-प्रकाशनम्, वाराणसी, 1976.
7. चतुर्वेदी, गिरिधरशर्मा परमेश्वरानन्द: & भास्कर:, वैयाकरणसिद्धान्तकौमुदी (वासुदेव-दीक्षितकृता बालमनोरमा एवं ज्ञानेन्द्रसरस्वतीकृता तत्त्वबोधिनी-संस्कृतव्याख्यासहित:), खण्डानि 01-04, मोतीलाल-बनारसी-दास:, दिल्ली, 1958-61.
8. त्रिपाठी, हरेराम: (सम्पादक:). *व्युत्पत्तिवाद:* (सुदर्शनाचार्यकृता आदर्शसंस्कृतटीकासहित:), राष्ट्रिय-संस्कृत-संस्थानम्, नवदेहली, प्रथमं संस्करणम्, 2011.
9. दास:, अच्युतानन्द: (सम्पादक:), *व्युत्पत्तिवाद:* (कृष्णभट्टकृता कृष्णभट्टीया, धर्मदत्तकृता गूथार्थतत्त्वालोक:, सुदर्शनाचार्यकृता आदर्श:, जयदेवकृता जया, शिवदत्तकृता दीपिका, लक्ष्मीनाथकृता प्रकाश:, वेणीमाधवशुक्लकृता शास्त्रार्थकलासंस्कृतव्याख्यासहित:), न्यू भारतीय बुक कॉर्पोरेशन, दिल्ली, प्रथमं संस्करणम्, 2004.
10. पाण्डेय:, गोपालदत्त:. वैयाकरणसिद्धान्तकौमुदी, चौखम्बा-विद्याभवनम्, वाराणसी, 2004.
11. मिश्र:, बी. शास्त्री, (सम्पादक:). वादवारिधि:, चौखम्बा-संस्कृत-

सीरीज्, वाराणसी, 1933.

12. मिश्रः, सच्चिदानन्दः (सम्पादकः), *व्युत्पत्तिवादः* (सम्पादककृता सुनन्दाहिन्दीव्याख्यासहितः), भारतीयविद्याप्रकाशनम्, वाराणसी, प्रथमं संस्करणम्, 2001.
13. शास्त्री, भीमसेनः (सम्पादकः). *लघुसिद्धान्तकौमुदी* (सम्पादककृता भैमीहिन्दीव्याख्यासहितः), दिल्ली, 1950-80.
14. सतपथी, हरेकृष्णः (सम्पादकः), *व्युत्पत्तिवादः* (एन्. एस्. रामानुज-ताताचार्यकृता विद्वन्मनोरमासंस्कृतटीकासहितः), राष्ट्रिय-संस्कृत-विद्यापीठम्, तिरुपतिः, प्रथमं संस्करणम्, 2011.

**ऐतिहासिकग्रन्था:**

15. Bangalit, D. C. History of Navya Nyaya in Bengal, Calcutta, 1951.
16. Vidyalankar, Satisa Chandra. History of Indian Logic (Ancient, Medieval and Modern Schools), Motilal Banarasi Das, Delhi, 2006.
17. J. Duncan, M Derrett. Essays in Classical and Modern Hindu Laws, Vol.-01 (Dharma Shastra and Related Ideas), Belgium, 1926.

**शोधप्रबन्ध:**

18. Kumar, Aravind. Critical study of Bhavananda's Karakachakra, Kurukshetra University, Kurukshetra, Haryana, 1983.

**लघुशोधप्रबन्ध:**

19. शर्मा, श्यामसुन्दरः. *व्युत्पत्तिवाद के कर्मकारक का समीक्षात्मक अध्ययन (द्विकर्मकधातु-निरुपण-पर्यन्त)*, दिल्ली-विश्वविद्यालयः, दिल्ली, 2015.

**शोधनिबन्ध:**

20. त्रिपाठी, रामप्रसादः. 'अभेदान्वयवादः'. न्यायसत्रम्, राधाबल्लभत्रिपाठी (सम्पादकः), सागरः. 1982.

**विश्वकोशग्रन्थौ**

21. National Encyclopedia of Bangladesh, http://www.banglapedia.org /HT/B_0539.htm
22. Singh, N. K. & Mishra, A. P. Encyclopedia of Oriental Philosophy and Religion, Vol. I (Hinduism), Global Publication House, New Delhi, 2005.

**कोशग्रन्था:**

23. Jha, V. N. Dictionary of Nyaya Terms, Centre for Advance Study in Sanskrit, University of Poona, Poona, 2001.
24. Katre, Sumitra Mangesh (S. M. Katre). A Dictionary of Panini, Vols 01- 03, Deccan College, Poona, 1968.
25. झलकीकरः, भीमाचार्यः. *न्यायकोशः*, निर्णयसागर प्रेस, मुम्बई, तृतीयं संस्करणम्, 1928.
26. विद्यासागरः, ईश्वरचन्दः (सम्पादकः). गोपालचन्द्रः (अनुवादकः). संस्कृत व्याकरण की उपक्रमणिका, खण्डानि 01-04, विद्याभवनसंस्कृतग्रन्थमाला (63), चौखम्बाविद्याभवनम्, वाराणसी, 1976.